# वास्तुशास्त्रस्य श्रौतपरम्परायां गृहं परितः वृक्षारोपणफलसमीक्षणम्

हिमाक्षी शर्मा*

**सारांशः -**

भारतीयसंस्कृतिः तथा परम्परा न केवलं धार्मिकाध्यात्मिकानुशासनानां संवाहिका वर्तते अपितु सा प्रकृत्या सह सन्तुलितजीवनपद्धतेः स्थापनमपि करोति। तत्र वास्तुशास्त्रं भारतीयस्थापत्यविद्यायाः मूलभूतम् अनुशासनं वर्तते, तत् न केवलं भवननिर्माणस्य वैज्ञानिकपद्धतिं प्रतिपादयति अपितु पर्यावरणेन तथा दैविकतत्त्वैस्सह मानवजीवनस्य सामञ्जस्यमपि प्रतिष्ठापयति। शोधपत्रेऽस्मिन् वास्तुशास्त्रस्य तथा श्रौतपरम्परायाश्चालोके गृहपरितः वृक्षारोपणस्य तथा तत्फलानां विश्लेषणं विधास्यते। इतोपि शोधपत्रस्यास्य उद्देश्यं वर्तते यत् प्राचीनभारतीयवास्तुपरम्परायां वृक्षारोपणं केवलं आस्थायाः रूढेर्वा विषयो नासीत् अपितु तत्पृष्ठभूमौ गहनवैज्ञानिक-सामाजिकतत्त्वानि विद्यमानानि आसन्। साम्प्रतिककाले औद्योगिकीकरणेन प्राकृतिकसन्तुलनं संकटे वर्तते। एतादृश्याम् अवस्थायाम् अस्य पारम्परिकज्ञानस्य पुनर्वीक्षा पर्यावरणीय चेतनां समुद्भावयति सहैव मानसिक-सामाजिक- भौतिकस्वास्थस्य च पुनर्स्थापनाय च सहायिका भविष्यतीति नास्त्यत्र संशयः।

**कूटशब्दाः -** वास्तुशास्त्रम्, श्रौतपरम्परा, वृक्षारोपणम्, पर्यावरणरक्षणम्, दिशानुसारी वृक्षविन्यासः, आध्यात्मिकम् औषधीयं च प्रभावः, भारतीयं स्थापत्यविज्ञानम्, नगरीयजीवने हरितसन्तुलनम्।

**प्रस्तावना** -

वेदान् आधारीकृत्य प्रवर्त्तिताः सर्वा अपि भारतीयाः विद्याः लोकोपकारपुरस्सरं स्व-स्व सिद्धान्तानुसारेण पुरुषार्थान् साधयन्त्यः मानवमात्रस्य परमोपकारं कुर्वन्तीति सुविदितमेव। तत्तत्प्रयोजनपुरिकासु तासु विद्यासु वास्तुविद्यायाः अस्ति तावत् अनितरसाधारणं महत्त्वम्।चरणव्यूहानुसारेण चतुर्णामपि वेदानां चत्वारः उपवेदाः भवन्ति। यथा च **“तत्र**

**वेदानामुपवेदाश्चत्वारो भवन्ति। ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेदोपवेदः सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान् व्यासः स्कन्धो वा।**[1] किन्तु महर्षिणा सुश्रुतेन चरकेण च यल्लिखितमस्ति तेनेदं ज्ञायते यत् आयुर्वेदः अथर्ववेदस्य उपवेदः वर्तते इति -

**"चतुर्णां ऋक्सामयजुरथर्ववेदानां आत्मनोऽथर्ववेदे भक्तिरादिश्यावेदो हि अथर्वणः दानस्वस्त्ययन बलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्राणि परिग्रहात् चिकित्सां प्राह।**[2] **इह खलु आयुर्वेदो नाम यदुपाङ्गमथर्ववेदस्य**[3] **विधाताथर्व सर्वस्वमायुर्वेदं प्रकाशयन्। स्वनाम्ना संहिता चक्रे लक्षश्लोकमयीमृजुम्॥**[4]

चरणव्यूहः भगवन्तं वेदव्यासं प्रमाणीकृत्य आयुर्वेदः ऋग्वेदस्योपवेदः वर्तते इति प्रतिपादयति। अश्विनीकुमारसंहिता चरकसुश्रुतादीनां आधारभूतो ग्रन्थः वर्तते, किन्तु तत्र आयुर्वेदः कस्यवेदस्योपवेदः भवतीति विषयः अस्पृष्टमेव। परन्तु चरकसुश्रुतादिप्रणीत आयुर्वेदस्य प्रसिद्धाः ग्रन्थाः आयुर्वेदस्य अथर्ववेदोपवेदत्वं सिद्धान्तयन्तीति मत्वा वयं ऋग्वेदस्य उपवेदः अर्थशास्त्रं नीतिशास्त्रं वा अस्तीति प्रतिपादयामः। एतावता स्थापत्यवेदविषये सर्वप्रथमं प्रश्नमिदं जागर्ति यत्- स्थापत्यवेदः कस्यां श्रेण्याम् अन्तर्भुक्तो भवेदिति। यदि वयं कौटिलीयार्थशास्त्रस्य द्वितीयाध्यायं पश्यामः तदा ज्ञायते यत् जनपदनिवेशदुर्गविधानराजभवनान्तःपुरव्यवस्थादीनां अत्रैव वर्णनमस्ति। अतः स्थापत्यवेदोऽपि अस्यां श्रेण्यामेवान्तर्भूतो भवति।

वास्तुशब्दः वस् धातोः वसेस्तुन् इत्यनेन उणादिसूत्रेण 'तुन्' प्रत्यये कृते सति निष्पद्यते। वास्तुशास्त्रस्य व्युत्पत्तिलभ्योऽर्थः भवति तावत् 'वसन्त्यस्मिन्नितिवास्तुः'। तात्पर्यमस्ति यत् यस्मिन् भवने मनुष्याः जनाः वा निवसन्ति तत् स्थानमेव 'वास्तु' पदेनाभिधीयते। वास्तु तथा वास्तुशास्त्रस्य परिचर्चा वैदिककालादारभ्य इदानीं यावद् जायमाना वर्तते। पुराकाले यदा मनुष्यः अरण्येषु गह्वरकुञ्जकन्दरादिषु निवसति स्म तदा पृथिव्यां आवासीययोजनाः नासन्। तस्मिन् काले मनुष्यः स्वसुरक्षादृष्ट्या कस्मिन्नपि सुरक्षितस्थाने स्वीयगृहं निर्माति स्म। सर्वप्रथमं महाराजेन पृथुना पृथिवीं समीकृत्य सुव्यवस्थितावासस्य कल्पना कृता। अनन्तरम् पृथुः ब्रह्मणः समीपं गत्वा अवदत् – हे ब्रह्मन् भवदादेशानुसारेण अहं पृथिवीं समीकृतवान् ,अधुना भवान् तत्र नगरादिनिर्माणस्य आदेशं प्रददातु। यथोक्तं वास्तुसारसंग्रहे-

**ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च।**
**घोषान् व्रजान् सशिविरानाकारान् खेटखर्वटान्।।**

---

[1] चरणव्यूह

[2] चरकसूत्रस्थान, अध्याय ३०

[3] सुश्रुत सूत्रस्थान, अध्याय १

[4] भावप्रकाश

**प्राक् पृथोरिह नैतेषां पुरग्रामादिकल्पना।**
**यथा सुखं वसन्तिस्म तत्र तत्राकुतोभयाः ।।**[5]

ततः भगवता ब्रह्मणा स्वीयचतुर्भिर्मुखैः विश्वकर्मादीनाम् उत्पत्तिः कृता। पुराणवचनानुसोरण ब्रह्मणः पूर्वमुखस्य संज्ञा विश्वभूः, दक्षिणमुखस्य विश्वविद् पश्चिममुखस्य विश्वस्रष्टा तथा उत्तरमुखस्य विश्वस्थ इति वर्तते । ब्रह्मणः विश्वभूनामकात् सम्मुखस्थमुखात् विश्वकर्मा, विश्वविद् नामकात् दक्षिणमुखात् मयः विश्वस्रष्टानामकात् पश्चिममुखात् मनुः तथा विश्वस्थनामकात् उत्तरमुखात् त्वष्टा प्रादुर्बभूव। ततः ब्रह्मा स्वीयपुत्रान् अवदत् भवन्तः पृथोरभिलाषानुसारेण पृथिव्यां नगरग्रामपुरादीनां पृथक् पृथक् रूपेण रचनां कुर्वन्तु। ततः विश्वकर्मा स्वपितरम् आश्वासनपूर्वकम् अवदत् इदानीं अहं स्वबुद्ध्यनुसारेण सुरासुरोरगनागादिभिस्सह पृथु एवं मनुष्याणां निवासार्थं सुन्दरपुरीनगरग्रामानां खर्वटादीनां च निर्माणं करिष्यामि। उक्तं च वास्तुसारसंग्रहे –

**गत्वोर्विवैन्यनृपतेः प्रियं तव करिष्यति।**
**नगरग्रामखेटादीन् करिष्यति च पृथक् पृथक्।।**
**स्वयं करिष्येऽहमथो निवासाय पृथोः पुरीम्।**
**विचित्रनगरग्रामखेटानतिमनोहरान्।।**[6]

ततः विश्वकर्मा अचिन्तयत् ब्रह्मणः आदेशस्यानुपालने कुशलशिल्पिनामपि आवश्यकता भविष्यति। एतदर्थं चत्वारः विश्वकर्माणः विभिन्नकार्येषु दक्षान् पुत्रान् समुत्पादयन्। तत्र विश्वकर्मा पुत्रः स्थपतिः मयनामकविश्वकर्मापुत्रः सूत्रग्राही, मनुनामकविश्वकर्मापुत्रः तक्षकः तथा त्वष्टानामकविश्वकर्मापुत्रः बार्द्धिकः समभवत्। एतेषां सर्वेषां विशेषज्ञानां संयुक्तप्रयासेनैव कस्यापि निर्माणकार्यस्य सम्पूर्तिः भवति। प्राचीनवास्तुशास्त्रे एतेषां विश्वकर्मापुत्राणाम् परिचयः समुपलभ्यते। तद्यथा-

**स्थपतिः सर्वशास्त्रज्ञो वेदविच्छास्त्रपारगः।**
**स्थापत्यधिकपतिर्यस्मात् तस्मात् स्थपतिरुच्यते।।**
**स्थपतेराज्ञया सर्वे सूत्रग्राह्यादयः सदा।**
**कुर्वन्ति शास्त्रादेशेन वास्तुवस्तु प्रयत्नतः।।**
**श्रुतज्ञः सूत्रग्राही च रेखाज्ञः शास्त्रवित्तमः।**
**विचारज्ञः श्रुतिज्ञश्च चित्रकर्मज्ञबार्द्धिकः।**
**तक्षकः कर्मवित्सभ्यः सम्बान्धवदयापरः।**
**इहैव लोकस्य यत्कर्म सर्व तच्छिल्पिनां गुरुः।**

[5] वास्तुसारसंग्रह प्राक्कथनम् पृः ५
[6] वास्तुसारसंग्रहः प्राक्कथनम् पृः ५

**न लभ्यते तु यत्तस्मादेभ्यः सर्व प्रसाधयेत्।।**[7]

इत्येवं प्रकारेण सुव्यवस्थितयोजनानुसारेण महाराजापृथुः मनोनुकूलां पृथिवीमुपरि ग्राम- खेट- खर्वट- पुरी- नगरादीनां निर्माणमकरोत्। इतः एव वास्तुशास्त्रस्य समुद्गमः अभवत्। एतेन सहैव वास्तुपुरुषस्यापि परिकल्पना शास्त्रेषु समुपलभ्यते। वास्तुपुरुषस्य वर्णनं पुराणेषु कथानकरूपेणोपलभ्यते। तद्यथा –

**संग्रामेऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात्क्षितौ**
**तस्मात् भूतमभूतच्च भीतिजननं द्यावापृथिव्योर्महत्।**
**तद्देवैः रभसा विगृह्य निहितं भूमावधोवक्त्रकम्**
**देवानां वसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः।।**[8]

अयं वास्तुपुरुषः भवन- पुर- नगर- तडाग- वापि- वन- यज्ञादि निर्माणे तथा एतेषां जीर्णोद्धारे सर्वत्र पूज्यो भवति। अस्यविषये बहुत्र उद्धृतमस्ति यत्- वास्तुपुरुषस्य पूजा सुखशान्तिप्रदायिनी भवति। यत्र वास्तुपुरुषस्य पूजा न भवति तत्र हानिः अशान्तिश्च जायते। उक्तं च –

**प्रासादे भवने तडागखनने कूपे च वाप्यां वने।**
**जीर्णोद्धारे पुरे च यागभवने प्रारम्भ निवर्तनो।।**
**वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये।**
**पादौ रक्षसि कं शिवेऽह्विकरयोः सन्धी च कोणद्वये।।**[9]

वस्तुतस्तु वास्तुशास्त्रे गृहनिर्माणसम्बन्धिनः सर्वेपि सिद्धान्ताः विशदतया परिष्कृतरूपेण च प्रतिपादिताः सन्त्येव। इतोपि वास्तुशास्त्रे गृहस्य परितः केषाम् वृक्षाणाम् आरोपणं कर्तव्यम् एतद् विषयेऽपि विस्तृतचर्चा दरीदृश्यते। वास्तुरत्नावल्याः चतुर्थः अध्यायः अयमेवविषयमाधारीकृत्य प्रणीतो वर्तते। अस्य अध्यायस्य नाम एव वर्तते "गृहचतुर्दिक्षु द्रुमरोपणनिर्णयाध्यायः" इति।

गृहस्य परितः दुग्धपूरितानां सकण्टकानां फलिनां च वृक्षाणान् आरोपणं न कर्तव्यम्। तथा च केचन् मन्दिराणां समक्षं गृहनिर्माणं शुभफलदायकं न भवति। तथा गृहचतुर्दिक्षु कीदृशाणां वृक्षाणां आरोपणं कर्तव्यम् इति विषये वास्तुराजवल्लभे वर्णनम् समुपलभ्यते। तद्यथा –

**वृक्षा दुग्धसकण्टाश्च फलिनस्त्याज्या गृहाद्दूरतः।**
**शस्ते चम्पकपाटले च कदली जाती तथा केतकी।**
**यामादूर्ध्वमशेषवृक्षसुरजा छाया न शस्ता गृहे**
**पार्श्वे कस्य हरेवीशपुरतो जैनानुचण्ड्याः क्वचित्॥**[10]

---

[7] वास्तुसारसंग्रहः प्राक्कथनम् पृः ६

[8] राजबल्लभमण्डनम् २.१

[9] राजवल्लभमण्डनम् २.२

[10] वास्तुराजबल्लभ्

तात्पर्यमस्ति यत् – दुग्धकण्टकफलयुताः वृक्षाः गृहात्  दूरे एव त्याज्याः भवन्ति। किन्तु चम्पक- पाटल- कदली- जाती- केतकीवृक्षाः शुभफलप्रदाः भवन्ति। एवञ्च यस्मिन् गृहे दिवसः द्वितीये तृतीये वा प्रहरे मन्दिरस्य वृक्षस्य वा छाया पतति तद् गृहम् हितकारी न भवति। किन्तु प्रथमे चतुर्थे वा प्रहरे गृहोपरि यदि छाया पतति चेत् सा दोषरहिता भवति। एवमेव ब्रह्म- विष्णु- सूर्य- महादेवमन्दिरस्य तथा जैनमन्दिरस्य च सम्मुखं भवननिर्माणं न करणीयम्। एवं यस्यां भूमौ चण्डीदेव्याः स्थापनं  देवीमन्दिरं वा भवति। तद् समीपेऽपि गृहनिर्माणं वर्जितमेवेति अवगन्तव्यम्।

गृहस्य परितः यदि वर्जिताः दुष्टाश्च वृक्षाः पूर्वमेव आरूढाः सन्ति तर्हि तेषाम् उच्छेदो न कर्तव्यः। तथा गृहसमीपे केषां द्रुमाणां परिवर्द्धनं शुभफलदायकं भवतीति सन्दर्भे पद्यमिदं निगदति। तद्यथा –

**दुष्टो भूतसमाश्रितोऽपि विटपी नोच्छिद्यते शक्तितः**
**तद्वद्बिल्वशमी  त्वशोकबकुलौ पुन्नागसच्चम्पकौ।**
**द्राक्षापुष्पकमण्डपं च तिलकान् कृष्णां वपेद्याडिमीं**
**सौम्यादेः शुभदौः कपित्थकवटावौदुम्बराश्वत्थकौ।।**[11]

अस्यायमाशयः यत् -  गृहसमीपस्थः दुष्टः भूतसमाश्रितोऽपि वृक्षः बलात् नोच्छेदनीयः। एवं बिल्व- शमी- अशोक- बकुल- पुन्नाग- चम्पक- द्राक्षा- पुष्पकमण्डप- कृष्णपिप्पली- दाडिमादीनां वृक्षाणां वपनं शुभफलप्रदायकं भवति। तथा गृहस्य उत्तरभागे कपित्थस्य पूर्वभागे वटस्य दक्षिणदिशि औदुम्बरस्य पश्चिमे अश्वत्थादिवृक्षाणाम् आरोपणं श्रेष्ठं भवतीति वास्तुशास्त्रविदां मतं वर्तते। अमुमेव श्लोकं सिद्धान्तीकृत्य मन्ये व्याकरणग्रन्थेषु कारकप्रकरणे उदाहरणमिदं समुपलभ्यते यत्- " "विषवृक्षोऽपि सम्वर्ध्य स्वयं छेत्तुम् असाम्प्रतम्" इति। एतदतिरिच्य वास्तुप्रदीपग्रन्थेऽपि शुभाऽशुभवृक्षाणां प्रसङ्गः विस्तरेण संप्राप्यते। गृहस्य कस्मिन् कोणे कस्य वृक्षस्यारोपणं हितकरं शुभफलदायकञ्च भवतीति स्पष्टतया अत्रोल्लिखितं वर्तते। तद्यथा –

**क्षीरवृक्षा वटाश्वत्थरक्तपुष्पद्रुमास्तथा।**
**सकण्टका शाल्मली च प्लक्षोदुम्बरसंज्ञकौ।।**[12]
**अग्निकोणे सदा दुष्टा मृत्युपीडाप्रदायकाः।**
**पुन्नागफलिनीनिम्बदाडिमाशोकजातिकाः।।**[13]
**नागकेसरकं पुष्पं जपाकुसुमकेसरे।**
**जयन्ती चन्दनं प्रोक्तं वचा चैवापराजिता।।**[14]
**मधुबिल्वाम्रभृङ्गाश्च नागराः ककुभादिकाः।**

---

[11] वास्तुरत्नावली, ४.२
[12] वास्तुरत्नावली ४.३
[13] वास्तुरत्नावली ४.४
[14] वास्तु रत्नावली ४.५

**यत्र यत्र स्थिताश्चैते नारिकेलादयः शुभाः ।।[15]**
**अश्वत्थकन्दं कन्दं च कदली बीजपुरकम् ।**
**गृहे यस्य प्ररोहन्ति स गृही न प्ररोहति ॥[16]**
**सर्वत्र पनसः शस्तो दक्षिणे सकलाः खलाः ।**

तात्पर्यमस्ति यत् दुग्धान्विताः कण्टकान्विताः रक्तताम्रपुष्पान्विताश्च वटन्यग्रोधाश्वत्थशाल्मलि पिच्छिलादिवृक्षाः अग्निकोणे सदा सर्वदा दुष्टा मृत्युपीडाप्रदायकाश्च भवन्ति। पुन्नागफलिनीनिम्ब दाडिमाशोकाशापालकजातीनागाकेशरजपाकेशरजयन्तीरक्तचन्दनवाचापराजिताः मधुबिल्वाभ्राः नागरनारिकेलादयश्च यस्यां कस्यापि दिशि स्थिताः तत्र शुभा एव भवन्ति। एतद्विपरीते अश्वत्थ कदम्बकदलीजम्बीरादिवृक्षाः यस्मिन् गृहे वर्तन्ते तद्गृहस्वामी उन्नतिमान् न भवतीति। पनसवृक्षः सर्वस्यां दिशि शस्तः शुभदः भवति। एवञ्च सकलाः वृक्षाः खला दुष्टाश्च भवन्ति।

ब्रह्मवैवर्तपुराणान्तर्गतकृष्णजन्मखण्डे वृक्षाणां मङ्गलमयतायाः वर्जनीयतायाश्च वर्णनं समुपलभ्यते। तत्र विश्वकर्मा श्रीकृष्णं वदति यत् गृहस्थानां कृते नारिकेलवृक्षः धनप्रदायको भवति। यदि स वृक्षः गृहस्य ईशानकोणे पूर्वस्यां दिशि वा भवति चेत् पुत्रप्रदो भवति। गृहस्य पूर्वस्यां दिशि आम्रवृक्षो भवति चेत् सम्पत्तिप्रदो भवति। तथैव पूर्वस्यां दिशि विल्व-पनस-जम्बीर-बदरीत्यादयो वृक्षआः सन्तानदायकाः , अवाच्या दिशि धनप्रदातारः तथा सर्वत्र सम्पत्तिप्रदायकाः भवन्ति। अनेन गृहस्थस्य सर्वतोभावेन उन्नतिः भवति। नगरेषु कण्टकयुताः वन्यजातीयवृक्षाश्च सर्वथा निषिद्धाः। एवं गृहं परितो वटवृक्षोऽपि अनुचित एव भवति। यतो हि तेन चौर्यभयं तिष्ठति। खर्जुरादिवृक्षा अपि वर्जिता एव। अन्नप्रदायकवृक्षेषु चणकः शाकादिषु कुष्माण्डपलाशकर्कटीहरिद्राहरीतकी आमलकीत्यादयः सर्वदा शुभफलदायकाः मन्यन्ते। वास्तुविषयकान्येषु ग्रन्थेषु समराङ्गनसूत्रधारवास्तुविद्यामनुष्यालयचन्द्रिकाराजवल्लभवास्तुशास्त्रं वास्तुसारमण्डनं मयमतम् मानसारं विश्वकर्माप्रकाशबृहत्संहितामानसोल्लासाः शिल्पदीपकवास्तुमञ्जरीत्यादिग्रन्थेष्वपि एताद्दश्य अवधारणाः विद्यमानास्सन्ति।

| क्रमः | दिशा | रोपणयोग्यवृक्षाः |
|---|---|---|
| 1. | पूर्व | बकुलः वटः एवं पनसः |
| 2. | दक्षिण | औदुम्बरः, पूगीफलम् |
| 3. | पश्चिम् | अश्वत्थः, सप्तच्छदः |

[15] वास्तुरत्नावली ४.६
[16] वास्तुरत्नावली ४.७

| | | |
|---|---|---|
| 4. | उत्तर | नागः,प्लक्षः,आम्रः |

- **उपसंहारः -**

पर्यावरणविज्ञानदृष्ट्या वृक्षायुर्वेददृष्ट्या च विषयोऽयं अत्यन्तो महत्त्वपूर्णः सुविशालश्च वर्तते। अद्यतनयुगे अस्य विषयस्य अत्यन्तप्रासङ्गिकता दरीदृश्यते । एतावता शोधपत्रेऽस्मिन् गृहं परितः वृक्षारोपणस्य शुभाशुभफलं निरूपितं वर्तते , तत्तु दिङ्मात्रम् एव । अत्र नैकेषामाचार्याणां ग्रन्थाः मतमतान्तराणि च वर्तन्ते । तेषु यः सिद्धान्तः सर्वैरपि आचार्यैः अभिमतो वर्तते तदनु गृहस्य परितः सर्वासु दिक्षु केषां वृक्षाणामारोपणं कर्तव्यं किञ्च तत् फलं तद्विषये मयाऽत्र प्रयासो विहितो वर्तते।

*शोधच्छात्रा, संस्कृतन्यायविभागः, कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः।